International Journal of Sanskrit Research 2018; 4(6): 78-82

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(6): 78-82
© 2018 IJSR
www.anantaajournal.com
Received: 17-09-2018
Accepted: 18-10-2018

डा.जयकृष्ण
(व्याकरण-अतिथि-प्राध्यापकः),
राष्ट्रियसंस्कृतसंस्थानम्,
वेदव्यासपरिसरः, बलाहरः,
प्रागपुरम्, कांगडा, हिमाचल प्रदेश,
भारत

Correspondence
डा.जयकृष्ण
(व्याकरण-अतिथि-प्राध्यापकः),
राष्ट्रियसंस्कृतसंस्थानम्,
वेदव्यासपरिसरः, बलाहरः,
प्रागपुरम्, कांगडा, हिमाचल प्रदेश,
भारत

# साध्वसाधुशब्दप्रयोगविमर्शः

**डा.जयकृष्ण**

**शोधसार**
वर्तमाने संस्कृतबान्धवानां सङ्कल्पशक्तेः कारणात् संस्कृतभाषया निरन्तरतया व्यहारात् च संस्कृतात् इतरः लोकः अस्मात् भ्रमात् तु बहिः आगतः अस्ति यत् संस्कृतभाषा कदापि व्यावहारिकभाषा नासीदेव इति। महाभारतस्य कालात् परम् अस्माकं भारते यथा उत्तरोत्तरं विभिन्नैः कारणैः संस्कृतेः नाशः जातः तथैव संस्कृतभाषा अपि व्यवहारपथात् अपगता। मानवस्य परिश्रमस्य क्षमतायाः अभावकारणेन संस्कृतस्य अल्पज्ञतया विभिन्नाः भाषाः च समुद्भूताः। आसु विभिन्नासु भाषासु विद्यमानः संस्कृतशब्दराशिरेव संस्कृतात् आसामुत्पत्तिं प्रमाणयति। अस्तु! अधुना अपि महतः प्रयासात् परं संस्कृतभाषा व्यवहाररूढा अस्ति इति तु महानेव विशेषः परन्तु वर्धमाने संस्कृतस्य व्यवहारे कियता प्रामाण्येन दोषरहितः शुद्धः संस्कृतव्यवहारः जायमानः अस्ति इत्यत्र अस्ति काचित् विमर्शस्य आवश्यकता। अधीतशास्त्रः कश्चित् सूक्ष्मेक्षिकया अधीतस्य शास्त्रस्य प्रायोगिकपक्षं पुरस्कृत्य विनियोगं यदि करोति तर्हि संस्कृतव्यवहारे क्व असङ्गतिः जायमाना अस्ति कथं च परिष्कारः कर्तव्यः इत्यादि स्पष्टं भवति। अतः एतादृशाय परिष्काराय चिन्तनं तु अपेक्षितम् एव भवति। तादृशस्य चिन्तनस्य एव प्रयासः अत्र लेखे कृतः अस्ति। यद्यपि लेखकः अल्पज्ञवैयाकरणः तथापि लोके एव श्रूयमाणानां संस्कृतव्यवहारदोषाणां सङ्कलनं विधाय तद्दोषाणां वारणाय कश्चन प्रयत्नः यथामति अत्र कृतः वर्तते।

**कुटशब्दाः** अन्तः, षष्टिः, पिदधातु, पुंसि, प्राचार्यचरः

## 1. प्रस्तावना

### 1.1 अन्तस्तात् बहिस्तात् इत्यादयः प्रयोगाः किं साधवः?

'अन्तस्तात् पानीयम् आनीय सर्वेभ्यः ददातु', 'बहिस्तात् आगतेभ्यः जनेभ्यः पानीयं ददातु' इति एतादृशाः प्रयोगाः प्रायशः श्रोतुम् उपलभ्यन्ते संस्कृतेन भाषितॄणां समूहे। अत्र अन्तः यः भागः प्रकोष्ठः इत्यादि वा, तस्मात्, इति वक्तुम् इच्छया प्रयोक्ता अन्तस्तात् इति वदति एवमेव च बहिः यः भागः, तस्मात्, इति वक्तुम् इच्छया बहिस्तात् इति प्रयोगं करोति। किम् अनयोः अन्तस्तात् बहिस्तात् इति शब्दयोः प्रयोगः साधुः अथवा असाधुः इति विचारस्य अस्ति काचित् महती आवश्यकता, यतः संस्कृतज्ञानाम् अस्माकं भाषा अपि संस्कृता परिष्कृता च भवति इत्यतः प्रत्येकं शब्दः सम्यक् प्रकारेण ज्ञात्वा एव प्रयोक्तव्यः। वस्तुतः अन्तस्तात् बहिस्तात् इति एतौ प्रयोगौ साधू न स्तः। कथं तर्हि बहवः अनयोः पदयोः प्रयोगं कुर्वन्ति इति जिज्ञासा जायते, यतः परम्परया श्रवणेन एव भाषा लोके प्रसृता भवति ननु!

इति चेत्, सत्यम्! जनाः पुरस्तात्, अधस्तात् इत्यादीनां प्रयोगाणां श्रवणं कुर्वन्तः अन्तस्तात् बहिस्तात् इति अपि व्यवहारं कुर्वन्ति। पुरस्तात्, अधस्तात् इति एते प्रयोगाः तु साधवः, परन्तु अन्तस्तात् बहिस्तात् इति प्रयोगद्वयं न साधु। एवं तर्हि अस्माकं पुनः शङ्का जायेत यत् पुरस्तात्, अधस्तात् इत्यादयः साधवः परन्तु श्रोतुम् एतैः समानाः अन्तस्तात् बहिस्तात् इति एतादृशाः प्रयोगाः कुतः न साधवः इति? इति चेत्, अत्र अस्माभिः किञ्चित् ज्ञातव्यम् अस्ति सरलेन व्याकरणस्य नियमेन, येन स्पष्टता भविष्यति यत् किमर्थं पुरस्तात्, अधस्तात् इत्यादयः साधवः किमर्थं च अन्तस्तात् बहिस्तात् इत्यादयः असाधवः इति।

पुरस्तात् इत्यत्र पूर्व इति दिक्-वाचकात् शब्दात् अस्तात्[1] इति प्रत्ययः भवति स्वार्थे। स्वार्थः अर्थात् पूर्व इति शब्दस्य स्वस्य यः अर्थः तस्मिन् एव अर्थे। ततः परं पूर्व इति दिशावाचकस्य शब्दस्य स्थाने पुर्[2] इति आदेशः भवति। पुर् अस्तात् इति मेलनेन पुरस्तात् इति रूपं भवति। इदं रूपम् अव्ययं भवति। अर्थात् अस्य एकम् एव रूपं भवति। च, वा, इति इत्यादीनि यथा, तथा। एवमेव अधर इति दिशावाचकात् शब्दात् अपि अस्तात् इति प्रत्ययः भवति स्वार्थे। ततः अधर इति दिशावाचकस्य स्थाने अधस् इति आदेशः भवति। अधस् अस्तात् इति मेलनेन अधस्तात् इति रूपं भवति। इदम् अपि अव्ययम् एव। अत्र अस्माभिः इदम् अवश्यं स्मर्तव्यं यत् अस्तात् इति प्रत्ययः दिशावाचकात् शब्दात् भवति। अन्तस् बहिस् इत्यादयः शब्दाः पूर्व अवर इत्यादीनां शब्दानाम् इव दिशावाचकाः शब्दाः न सन्ति। अतः अन्तस् बहिस् इत्यादिभ्यः शब्देभ्यः अस्तात् इति प्रत्ययः अपि न भवति। तस्मात् अन्तस्तात् बहिस्तात् इत्यादयः प्रयोगाः अपि न भवन्ति। एवं तर्हि अस्माभिः अन्तस्तात् बहिस्तात् इत्यादयः प्रयोगाः प्रयत्नेन वारणीयाः। अन्तस्तात् बहिस्तात् इति द्वयोः शब्दयोः स्थाने अन्तर्भागात् अथवा अन्तः, बहिर्भागात् अथवा बहिः इति एतावद् एव प्रयोगं कुर्मः चेद् अपि अपेक्षितस्य अर्थस्य पूर्तिः भवति।

इदम् अपि एकम् अवधानं कर्तव्यं यत् सर्वेभ्यः अपि दिशावाचकेभ्यः शब्देभ्यः अस्तात् इति प्रत्ययः भवति इति नास्ति। यथा दक्षिण, उत्तर इति दिशावाचकाभ्यां शब्दाभ्याम् अस्तात् इति प्रत्ययः न भवति। एताभ्यां शब्दाभ्यां अतस्[3] इति प्रत्ययः भवति। अतः दक्षिण अतस् = दक्षिणतः, उत्तर अतस् = उत्तरतः इति एवं रूपम् अनयोः दिशावाचकयोः शब्दयोः ज्ञातव्यम्। इतोऽपि अधिकाय विस्तराय तु भगवतः पाणिनेः आचार्यस्य हृदयम् अष्टाध्यायी द्रष्टव्यम्।

## 2. षष्टिः अथवा षष्ठिः ?

'सभागारे षष्टिः (६०) जनाः उपविष्टाः सन्ति' इति वाक्यस्य स्थाने केचन 'सभागारे षष्ठिः (६०) जनाः उपविष्टाः सन्ति' इति वाक्यस्य प्रयोगं कुर्वन्ति। द्वयोः वाक्ययोः मध्ये षष्टिः इति पदे षष्ठिः इति च पदे कश्चन भेदः दृश्यते। एकत्र ट्-वर्णः अस्ति अपरत्र च ठ्-वर्णः अस्ति। अन्ये वर्णाः तु समानाः सन्ति। एवं प्रकारेण द्विविधं प्रयोगं दृष्ट्वा सन्देहः भवति यत् अनयोः कः प्रयोगः साधुः स्यात् इति। सन्देहः तदा तु इतोऽपि प्रबलः भवति यदा कश्चन पाठकः टङ्कणस्य दोषस्य कारणात् ठ्-वर्णेन युक्तं षष्ठिः इति पदं पश्यति। कदाचित् षष्टिः इति अपि पश्यति। एतादृशस्य टङ्कणस्य प्रमादस्य कारणात् एव कश्चन षष्टिः, षष्ठिः इति द्वयम् अपि साधुः भवति इति कश्चन वदन् श्रुतः मया। वस्तुतः षष्टिः इति एव साधुः। षष्ठिः इति तु असाधुः एव। कथं षष्टिः इति एव शुद्धम् षष्ठिः इति च अशुद्धम् इति ज्ञातुं किम् अत्र शब्दस्य अनुशासनम् इति किञ्चित् इव विचार्यते यदि तर्हि स्पष्टता भवति षष्टिः इति एव च सर्वदा अस्माकं बुद्धौ आरूढं भवति।

तथाहि – भगवान् पाणिनिः षट् दशतः परिमाणम् अस्य इति अस्मिन् अर्थे षण्णां दशतां स्थाने षष् इति आदेशं कृत्वा

---

[1] भट्टोजिदीक्षितः (सम्पादकः – गिरिधरशर्मा), संस्करण - २०१०, वैयाकरणसिद्धान्तकौमुदी, द्वितीयः भागः, पृष्ठ संख्या - ५९७, सू.सं.१९७४, वाराणसी, मोतीलाल बनारसीदास।

[2] भट्टोजिदीक्षितः (सम्पादकः – गिरिधरशर्मा), संस्करण - २०१०, वैयाकरणसिद्धान्तकौमुदी, द्वितीयः भागः, पृष्ठ संख्या - ५९७, सू.सं.१९७५, वाराणसी, मोतीलाल बनारसीदास।

[3] ब्रह्मदत्त जिज्ञासु (व्याख्याता), *अष्टाध्यायी प्रथमावृत्ति,* (नवम संस्करण) २००५, रामलाल कपूर ट्रस्ट, रेवली – सोनीपत, हरयाणा, द्वितीय भाग, पृष्ठ संख्या - २५९, सूत्रसंख्या – ५.३.२८

तस्मात् ति इति प्रत्ययस्य निपातनं [4] (पठनं) करोति। दशत् इत्यस्य अर्थः भवति १० इति सङ्ख्यया युक्तः यः कः अपि। अर्थात् दशसङ्ख्याकं परिमाणं यस्य भवति सः दशत् इति भवति। दशत् (१०) दशतौ (२०) दशतः (३०,४०, ...) इत्येवं रूपाणि भवन्ति। एवं तर्हि षण्णां दशतां स्थाने षष् इति आदेशं करोति इत्युक्तम्। इदम् एवम् अवगन्तव्यम् - दशत् (१०) + दशत् (१०) + दशत् (१०) + दशत् (१०) + दशत् (१०) + दशत् (१०) इति एते षट् दशतः (६०) सन्ति। एतेषां षण्णां दशतां स्थाने षष् इति आदेशं करोति आचार्यः। ततः षष् ति इति अवस्थायाम् षष् इत्यस्य पदसञ्ज्ञायाः [5] अभावम् अपि कथयति। यतः षष् ति इति अवस्थायां षष् इत्यस्य यदि पदसञ्ज्ञा स्यात् तर्हि अन्तिमस्य ष्-वर्णस्य ड्-वर्णः [6] स्यात्। षड् ति इति स्यात्। परन्तु पदसञ्ज्ञायाः अभावे षष् ति इति अवस्थायां ति इत्यस्य त्-वर्णस्य ष्टुत्वं [7] कृत्वा ट्-वर्णः भवति। षष् + टि इति मेलनेन षष्टि पदकार्यं च कृत्वा षष्टिः इति भवति। अतः स्पष्टं भवति यत् षष्टिः इति ट्-वर्णेन युक्तं रूपम् एव ऋषिभिः उपदिष्टम् अस्ति।

## 3. पिदधातु / अपिदधातु

'महोदय! कृपया द्वारं पिदधातु', / 'महोदय! कृपया द्वारम् अपिदधातु' इति केचन द्वे वाक्ये स्तः। अनयोः वाक्ययोः प्रथमे वाक्ये पिदधातु इति लोट्-लकारस्य क्रियापदम् अस्ति। द्वितीये वाक्ये अपिदधातु इति अपि लोट्-लकारस्य एव क्रियापदम् अस्ति। प्रायशः व्यवहारे वयं पिदधातु इति क्रियापदस्य प्रयोगम् अधिकतया शृणुमः। पिदधातु अर्थात् पिधानं (close) करोतु इति अर्थः। परन्तु अपिदधातु इति पदस्य प्रयोगः अधिकः न श्रूयते। अपिदधातु इत्यस्य अपि अर्थः पिधानं (close) करोतु इति एव भवति। यस्य पिदधातु इति पदस्य प्रयोगं वयं कुर्मः तस्य निर्माणं कथं भवति इति भाषायाः जिज्ञासूनां काचित् जिज्ञासा उत्पन्ना भवति। यदि च जिज्ञासवः अपिदधातु इति क्रियापदम् अपि शृण्वन्ति तर्हि तु जिज्ञासा पूर्वापेक्षया इतोऽपि अधिका जायते। सन्देहः अपि उत्पन्नः भवति यत् पिदधातु इति प्रयोगः भवति किल! किम् इदम् अपिदधातु इति??? अस्तु! उक्तयोः द्वयोः अपि जिज्ञासयोः समाधानम् अधुना शब्दस्य शास्त्रस्य अतीव सरलं विवरणं ज्ञात्वा कुर्मः। तथाहि –

दधातु इति क्रियापदस्य विषये तु वयं जानीमः एव। इदं क्रियापदं धा-धातोः लोट्-लकारस्य प्रथमपुरुषस्य एकवचने अस्ति। यथा दा इति धातोः ददातु तथैव धा इति धातोः दधातु इति क्रियापदं भवति। अस्मात् क्रियापदात् पूर्वम् अपि इति उपसर्गं योजयामः यदि तर्हि अपि + दधातु इति मेलनेन अपिदधातु इति रूपं भवति। ततः परम् अपि इत्यस्य अकारस्य लोपः भवति आचार्यस्य भागुरेः मते। एवं तर्हि पि + दधातु इति मेलनेन पिदधातु इति क्रियापदं भवति। एषः लोपः भागुरेः आचार्यस्य मते एव भवति अन्येषाम् आचार्याणां मते न भवति इत्यतः अपिदधातु इति क्रियापदं सिद्धं भवति। भागुरेः आचार्यस्य इदं मतं 'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः' [8] इति एतेन पद्यांशेन सिद्धान्तकौमुद्याम् उक्तं भट्टोजिदीक्षितवर्येण। अर्थात् वष्टि (इच्छति) भागुरिः अल्लोपम् (अकारस्य लोपम्) अवाप्योः (अव अपि इति अनयोः) उपसर्गयोः। वस्तुतः अस्य श्लोकस्य सङ्कलनं भट्टोजिदीक्षितवर्येण कृतम् अस्ति कौमुद्याम्। महाभाष्ये तु अयं श्लोकः न दृश्यते इति नागेशः वदति। तथापि पिधानम्, पिदधातु इत्यादयः प्रयोगाः ऋषिसम्मताः न सन्ति इति वक्तुं न शक्यते यतः स्वयं भगवता पाणिनिना

[4] ब्रह्मदत्त जिज्ञासु (व्याख्याता), *अष्टाध्यायी प्रथमावृत्ति,* (नवम संस्करण) २००५, रामलाल कपूर ट्रस्ट, रेवली – सोनीपत, हरयाणा, द्वितीय भाग, पृष्ठ संख्या - २६६, सूत्रसंख्या – ५.१.५८

[5] भट्टोजिदीक्षितः (सम्पादकः – गिरिधरशर्मा), संस्करण - २०१०, वैयाकरणसिद्धान्तकौमुदी, प्रथमः भागः, पृष्ठ संख्या - २३२, सू.सं.२३०, वाराणसी, मोतीलाल बनारसीदास।

[6] भट्टोजिदीक्षितः (सम्पादकः – गिरिधरशर्मा), संस्करण - २०१०, वैयाकरणसिद्धान्तकौमुदी, प्रथमः भागः, पृष्ठ संख्या - ९८, सू.सं.८४, वाराणसी, मोतीलाल बनारसीदास।

[7] ब्रह्मदत्त जिज्ञासु (व्याख्याता), *अष्टाध्यायी प्रथमावृत्ति,* (नवम संस्करण) २००५, रामलाल कपूर ट्रस्ट, रेवली – सोनीपत, हरयाणा, तृतीय भाग, पृष्ठ संख्या - ६२५, सूत्रसंख्या – ८.४.४०

[8] भट्टोजिदीक्षितः (सम्पादकः – गिरिधरशर्मा), संस्करण - २०१०, वैयाकरणसिद्धान्तकौमुदी, प्रथमः भागः, पृष्ठ संख्या - ४९२, सू.सं.४५२, वाराणसी, मोतीलाल बनारसीदास।

रचिते अर्धर्चादि-गणे[9] पिधान इति शब्दस्य पाठः दृश्यते। 'उताप्योः समर्थयोर्लिङ्'[10] इत्यस्य सूत्रस्य प्रत्युदाहरणत्वेन 'अपिधास्यति द्वारम्' इति काशिकाग्रन्थे दृश्यते। अतः पिदधातु अपिदधातु इति उदाहरणद्वयम् अपि शास्त्रसम्मतम् एव वर्तते। एवमेव अव इत्यस्य उपसर्गस्य भागुरेः मते अकारस्य लोपस्य प्रसिद्धम् उदाहरणं काळीदासस्य 'पूर्वापरौ तोयनिधी वगाह्य'[11] इति द्रष्टव्यम्। येषाम् आचार्याणाम् अत्र अकारस्य लोपः न तेषाम् मते अवगाह्य इति बोध्यम्। एवं च अस्माकं पुरतः भागुरेः अन्येषां च आचार्याणां द्वयोः मतयोः उपस्थितेः द्वारा अव अपि इत्यनयोः लोपस्य विकल्पः उपस्थितः भवति। अतः पिदधातु / अपिदधातु इति उभयथा प्रयोगं कर्तुं शक्नुमः।

## 4. पुंसि इतिवत् किं नपुंसि इति अपि?

'राम इति शब्दस्य प्रयोगः पुंसि भवति' इति अस्ति एकं वाक्यम्। अर्थात् राम इति शब्दस्य प्रयोगः पुंल्लिङ्गे भवति इति अर्थः अस्य वाक्यस्य। अस्मिन् वाक्ये पुंल्लिङ्गं वक्तुं पुंस् इति शब्दस्य सप्तमी-विभक्तेः एकवचनस्य प्रयोगः कृतः अस्ति पुंसि इति। एवमेव यदा कस्यचित् शब्दस्य नपुंसकलिङ्गं कथनीयं भवति तदा केचन 'फल इति शब्दस्य प्रयोगः नपुंसि भवति' इति एवं प्रकारेण वाक्यं वदन्ति। इदं वाक्यं सम्यक् एव अस्ति। परन्तु अत्र नपुंसकलिङ्गं कथयितुं नपुंसि इति सप्तमी-विभक्तेः एकवचने यत् पदम् उक्तं तत् पदं किं शुद्धम् अथवा अशुद्धम् इति कञ्चन विचारम् अत्र कथयामः –

वस्तुतः नपुंसकलिङ्गे यः शब्दः भवति तस्य शब्दस्य लिङ्गं कथयितुं नपुंसक इति शब्दस्य प्रयोगः एव उचितः। अतः 'फल इति शब्दस्य प्रयोगः नपुंसि भवति' इति वाक्यस्य अपेक्षया 'फल इति शब्दस्य प्रयोगः नपुंसके / नपुंसकलिङ्गे भवति' इति एव वक्तव्यम्। तत्र कारणं वदामः शब्दशास्त्रस्य चिन्तनं कृत्वा – भगवान् पाणिनिः नपुंसक इति शब्दे स्त्री पुंस् इति द्वयोः शब्दयोः स्थाने पुंसक इति शब्दस्य निपातनं[12] (पठनं) करोति। ततः नञ्(न) इत्यस्य समासं करोति पुंसक इत्यनेन पदेन सह। न पुंसक इति मेलनेन समासेन वा नपुंसक इति भवति। यद्यपि नपुंसक इति प्रयोगे नञः न्-वर्णस्य लोपः[13] प्राप्नोति। तथा चेत् न + ब्राह्मण = अब्राह्मण इति यथा तथा न + पुंसक = अपुंसक इति स्यात्। परन्तु नपुंसक इति शब्दस्य न्-वर्णस्य लोपस्य अभावं[14] सूत्रकारः स्वयम् एव कथयति अतः अपुंसकम् इति न, अपितु नपुंसकम् इति एव भवति। अतः 'फल इति शब्दः नपुंसके भवति' इति एवं प्रकारेण प्रयोगः कर्तव्यः।

अस्तु! युक्त्या युक्तः प्रयोगः तु विचारितः। अधुना नपुंसि इति प्रयोगः नपुंसकलिङ्गं वक्तुं कथं न युज्यते इति किञ्चित् विचारयामः। तथाहि – न(नञ्) पुमान् = अपुमान् इति नञ् इत्यस्य पुंस् इति शब्देन सह समासं कृत्वा अपुमान् इति प्रथमायाः विभक्तेः एकवचने यथा भवति तथैव सप्तम्याः एकवचने न पुंसि = अपुंसि इति प्रयोगः भवति। नपुंसि इति तु न भवति। किञ्च, अपुंसि इत्यस्य प्रयोगं कृत्वा अपि नपुंसकस्य एव बोधः न स्यात् अपितु स्त्रियाः अपि बोधः स्यात्। तेन फल इत्यादीनां शब्दानां लिङ्गस्य निश्चयः अपि न स्यात्।

ननु! न + पुंसि इत्यत्र नञ्-भिन्नस्य न इति अन्यस्य एव शब्दस्य समासं पुंसि इत्यनेन सह कृत्वा न्-वर्णस्य लोपस्य अभावेन नपुंसि इति अपि रूपं निर्मातुं शक्नुमः, यतः न्-वर्णस्य लोपः तु नञः एव भवति न तु न इत्यस्य, इति यदि कथ्येत तर्हि अपि केवलं नपुंसकस्य एव प्रतीतिः न स्यात्

[9] भट्टोजिदीक्षितः (सम्पादकः – गिरिधरशर्मा), संस्करण - २०१०, वैयाकरणसिद्धान्तकौमुदी, द्वितीयः भागः, पृष्ठ संख्या - १२१, सू.सं.८१३, वाराणसी, मोतीलाल बनारसीदास।

[10] ब्रह्मदत्त जिज्ञासु (व्याख्याता), *अष्टाध्यायी प्रथमावृत्ति,* (नवम संस्करण) २००५, रामलाल कपूर ट्रस्ट, रेवली – सोनीपत, हरयाणा, प्रथम भाग, पृष्ठ संख्या - ४८३, सूत्रसंख्या – ३.३.१५२

[11] पं.प्रद्युम्न पाण्डेय (व्याख्याता), *कुमारसम्भवम्,* (नवम संस्करण) २०१३, चौखम्बा विद्याभवन, वाराणसी, पृष्ठ संख्या - ०१, सर्गसंख्या – १, श्लो.सं.०१

[12] ब्रह्मदत्त जिज्ञासु (व्याख्याता), *अष्टाध्यायी प्रथमावृत्ति,* (नवम संस्करण) २००५, रामलाल कपूर ट्रस्ट, रेवली – सोनीपत, हरयाणा, प्रथम भाग, पृष्ठ संख्या - २०५, सूत्रसंख्या – ६.३.७४

[13] भट्टोजिदीक्षितः (सम्पादकः – गिरिधरशर्मा), संस्करण - २०१०, वैयाकरणसिद्धान्तकौमुदी, द्वितीयः भागः, पृष्ठ संख्या - ८७, सू.सं.७५७, वाराणसी, मोतीलाल बनारसीदास।

[14] भट्टोजिदीक्षितः (सम्पादकः – गिरिधरशर्मा), संस्करण - २०१०, वैयाकरणसिद्धान्तकौमुदी, द्वितीयः भागः, पृष्ठ संख्या - ८९, सू.सं.७५९, वाराणसी, मोतीलाल बनारसीदास।

स्त्रियाः अपि प्रतीतिः स्यात्। इत्येकं कारणम्, अपरञ्च नपुंसि इत्यादीनां शब्दानां अनभिधानात् अर्थात् शिष्टानां प्रयोगस्य अभावात् प्रयोगः न क्रियते। यतः शब्दशास्त्रम् अपि स्थितस्य एव प्रयोगस्य गतिं चिन्तयति। अतः नपुंसि इति प्रयोगः यत्नपूर्वकं वारणीयः।

## 5. प्राचार्यचरः अस्ति / प्राचार्यचरः आसीत्

'एषः महोदयः अस्माकं प्राचार्यचरः अस्ति' इति एतादृशस्य वाक्यस्य प्रायशः प्रयोगं वयं तदा कुर्मः यदा अस्माकं पुरतः उपविष्टवतः अस्माकं विद्यालयस्य भूतपूर्वस्य प्राचार्यमहोदयस्य परिचयं कारयन्तः भवामः कस्यचित् सविधे। अस्मिन् वाक्ये प्राचार्यचरः इति पदस्य भूतपूर्वः प्राचार्यः इति अर्थः भवति। अयम् अर्थः कथं ज्ञातः भवति इति चेत् भूतपूर्व इत्यस्मिन् अर्थे प्राचार्य इति शब्दात् चरट्[15] इति प्रत्ययं करोति भगवान् पाणिनिः। ट्-वर्णस्य लोपः भवति। प्राचार्यचर इति रूपं भवति। ननु! पूर्वम् उक्ते एव प्रसङ्गे 'एषः महोदयः अस्माकं प्राचार्यचरः आसीत्' इति लङ्-लकारस्य आसीत् इति क्रियापदेन युक्तं वाक्यम् अपि किं साधु स्यात् इति मम विभागीयेन आचार्येण एकदा शङ्का कृता। शङ्कायाः अवसरः आसीत् यत् प्राचार्यचरः इति एतावत् एव उक्त्वा भूतपूर्वः प्राचार्यः इति भूतकालयुक्तः अर्थः लभ्यते खलु! अतः 'एषः महोदयः अस्माकं प्राचार्यचरः आसीत्' इति वाक्यं न युज्येत इति। इति चेत् सत्यम्, शङ्कायाः अवसरः तु प्रतिभाति। अतः 'एषः महोदयः अस्माकं प्राचार्यचरः अस्ति' इत्येव वक्तव्यम्। परन्तु 'एषः महोदयः अस्माकं प्राचार्यचरः आसीत्' इति अपि वाक्यं प्रसङ्गानुरोधेन औचित्यपूर्णं भवितुम् अर्हति। तत्र कथम् औचित्यम् इति चेत्, यः विद्यालयस्य प्राचार्यचरः सः यदि अधुना अस्मिन् जगति एव नास्ति, परन्तु पूर्वम् आसीत्, तर्हि तस्य छायाचित्रादिकं दर्शयित्वा 'एषः महोदयः अस्माकं प्राचार्यचरः आसीत्' इति वाक्यम् अपि सङ्गतं भवेत्। इत्थमेव चरडन्तेषु शब्दान्तरेषु अपि निर्वाहः कर्तव्यः इति चिन्तयामि। अग्रे शिष्टाः प्रमाणम्।

[15] ब्रह्मदत्त जिज्ञासु (व्याख्याता), *अष्टाध्यायी प्रथमावृत्ति,* (नवम संस्करण) २००५, रामलाल कपूर ट्रस्ट, रेवली – सोनीपत, हरयाणा, द्वितीय भाग, पृष्ठ संख्या - ३६९, सूत्रसंख्या – ५.३.५३

## 6. सन्दर्भग्रन्थसूची


1. वैयाकरणसिद्धान्तकौमुदी, रचयिता – भट्टोजिदीक्षितः, (सम्पादकः – गिरिधरशर्मा), संस्करणम् – २०१०, वाराणसी, मोतीलाल बनारसीदास।
2. अष्टाध्यायी प्रथमावृत्तिः, रचयिता – पाणिनिः, (व्याख्याता – ब्रह्मदत्तजिज्ञासुः), संस्करणम् – २००५, रामलाल कपूर ट्रस्ट, रेवली – सोनीपत, हरयाणा।
3. महाभाष्यम्, रचयिता – पतञ्जलिः, (व्याख्याता – चारुदेवशास्त्री), संस्करणम् – २००९, मोतीलाल बनारसीदास, जवाहर नगर – दिल्ली
4. कुमारसम्भवम्, रचयिता – कालिदासः, (व्याख्याता – पं.प्रद्युम्नपाण्डेयः), संस्करणम् – २०१३, चौखम्बा विद्याभवन, वाराणसी।